श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ एकोनत्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ एकोनत्रिंशः सर्गः ॥

## सीतायाः शुभशकुनानि

तथागतां तां व्यथितामनिन्दितां
व्यतीतहर्षां परिदीनमानसाम्।
शुभां निमित्तानि शुभानि भेजिरे
नरं श्रिया जुष्टमिवोपसेविनः॥ **5.29.1** ॥

तस्याः शुभं वाममरालपक्ष्म -
राज्यावृतं कृष्णविशालशुक्लम्।
प्रास्पन्दतैकं नयनं सुकेश्या
मीनाहतं पद्ममिवाभिताम्रम्॥ **5.29.2** ॥

भुजश्च चार्वञ्चितवृत्तपीनः
परार्ध्यकालागुरुचन्दनार्हः।
अनुत्तमेनाध्युषितः प्रियेण
चिरेण वामः समवेपताशु॥ **5.29.3** ॥

गजेन्द्रहस्तप्रतिमश्च पीन -
स्तयोर्द्वयोः संहतयोस्तु जातः।
प्रस्पन्दमानः पुनरूरुरस्या
रामं पुरस्तात् स्थितमाचचक्षे॥ **5.29.4** ॥

शुभं पुनर्हेमसमानवर्ण -
मीषद्रजोध्वस्तमिवातुलाक्ष्याः।

वासः स्थितायाः शिखराग्रदन्त्याः
    किञ्चित् परिस्रंसत चारुगात्र्याः ॥ **5.29.5** ॥

एतैर्निमित्तैरपरैश्च सुभ्रूः
    सञ्चोदिता प्रागपि साधुसिद्धैः।
वातातपक्लान्तमिव प्रणष्टं
    वर्षेण बीजं प्रतिसञ्जहर्ष ॥ **5.29.6** ॥

तस्याः पुनर्बिम्बफलोपमोष्ठं
    स्वक्षिभ्रुकेशान्तमरालपक्ष्म।
वक्त्रं बभासे सितशुक्लदंष्ट्रं
    राहोर्मुखाच्चन्द्र इव प्रमुक्तः ॥ **5.29.7** ॥

सा वीतशोका व्यपनीततन्द्रा
    शान्तज्वरा हर्षविबुद्धसत्त्वा।
अशोभतार्या वदनेन शुक्ले
    शीतांशुना रात्रिरिवोदितेन ॥ **5.29.8** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनत्रिंशः सर्गः ॥